॥ श्रीगुरुभ्यो नमः ॥

कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

षष्ठकाण्डे द्वितीयः प्रश्नः

सोममन्त्रब्राह्मणनिरूपणं

ॐ नमः परमात्मने । श्री गुरुभ्यो नमः । हरिः ॐ

यदुभौ विमुच्याऽऽतिथ्यङ्गृह्णीयाद्यज्ञँव्विँच्छिन्द्याद्यदुभावविमुच्य यथाऽनागतायाऽऽतिथ्य-
ङ्क्रियते तादृगेव तद्विमुक्तोऽन्योऽनड्वान् भवत्यविमुक्तोऽन्योऽथाऽऽतिथ्यङ्गृह्णाति यज्ञस्य सन्तत्यै
पत्न्यन्वारभते पत्नी हि पारीणह्यस्येशे पत्नियैवानुमतन्निर् वपति यद्वै पत्नी यज्ञस्य करोति मिथु-
नन्तदथो पत्निया एवै ॥ [१] ॥ ष यज्ञस्यान्वारंभोऽनवच्छित्त्यै यावद्भिर् वै राजाऽनुचरैराग-
च्छति सर्वेभ्यो वै तेभ्य आतिथ्यङ्क्रियते छन्दाꣳसि खलु वै सोमस्य राज्ञोऽनुचराण्यग्नेरातिथ्य-
मसि विष्णवे त्वेत्याह गायत्रिया एवैतेन करोति सोमस्याऽऽतिथ्यमसि विष्णवे त्वेत्याह त्रिष्टुभ
एवैतेन करोत्यतिथेरातिथ्यमसि विष्णवे त्वेत्याह जगत्या ॥ [२] ॥ एवैतेन करोत्यग्नये त्वा
रायस्पोषदाव्न्ने विष्णवे त्वेत्याहानुष्टुभ एवैतेन करोति श्येनाय त्वा सोमभृते विष्णवे त्वेत्याह
गायत्रिया एवैतेन करोति पञ्च कृत्वो गृह्णाति पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञमेवाव रुन्धे
ब्रह्मवादिनो वदन्ति कस्माथ् सत्याद्गायत्रिया उभयत आतिथ्यस्य क्रियत इति यदेवादः सोममा
॥ [३] ॥ ऽहरत् तस्माद्गायत्रिया उभयत आतिथ्यस्य कियते पुरस्ताच्चोपरिष्टाच्च शिरो वा एतद्
यज्ञस्य यदातिथ्यन्नवकपालः पुरोडाशो भवति तस्मान्नवधा शिरो विष्यूतन्नवकपालः पुरोडाशो
भवति ते त्रयस्त्रिकपालास्त्रिवृता स्तोमेन सम्मितास्तेजस्त्रिवृत् तेज एव यज्ञस्य शीर्षन् दधाति
नवकपालः पुरोडाशो भवति ते त्रयस्त्रिकपालास्त्रिवृता प्राणेन सम्मितास्त्रिवृद्वै ॥ [४] ॥ प्राण-
स्त्रिवृतमेव प्राणमभिपूर्वँय्यज्ञस्य शीर्षन् दधाति प्रजापतेर् वा एतानि पक्ष्माणि यदश्ववाला

ऐक्ष्वी तिरश्ची यदाश्ववालः प्रस्तरो भवत्यैक्ष्वी तिरश्ची प्रजापतेरेव तच्चक्षुः सम्भरति देवा वै या आहुतीरजुहवुस्ता असुरा निष्कावमादन् ते देवाः कार्ष्मर्यमपश्यन् कर्मण्यो वै कर्मैनेन कुर्वीतेति ते कार्ष्मर्यमयान् परिधीन् ॥ [५] ॥ कुर्वत तैर् वै ते रक्षाꣳस्यपाघ्नत यत् कार्ष्मर्य- मयाः परिधयो भवन्ति रक्षसामपहत्यै सꣳ स्पर्शयति रक्षसामनन्ववचाराय न पुरस्तात् परि दधात्यादित्यो ह्येवोद्यन् पुरस्ताद् रक्षाꣳस्यपहन्त्यूर्ध्वे समिधावा दधात्युपरिष्टादेव रक्षाꣳ- स्यप हन्ति यजुषाऽन्यां तूष्णीमन्यां मिथुनत्वाय द्वे आ दधाति द्विपाद्यजमानः प्रतिष्ठित्यै ब्रह्म- वादिनो वदन्त्य ॥ [६] ॥ ग्निश्च वा एतौ सोमश्च कथा सोमायाऽऽतिथ्यं क्रियते नाग्नय इति यदग्नावग्निम्मथित्वा प्रहरति तेनैवाग्नय आतिथ्यं क्रियतेऽथो खल्वाहुरग्निः सर्वा देवता इति यद्ध- विरासाद्याग्निम्मन्थति हव्यायैवाऽऽ*सन्नाय सर्वा देवता जनयति ॥ [७] ॥

(पत्निया एव जगत्या आ त्रिवृद्वै परिधीन् वदन्त्ये कचत्वारिꣳशच्च) ॥ १ ॥

देवासुराः सय्ँयत्ता आसन् ते देवा मिथो विप्रिया आसन् तेऽ(१)न्योऽन्यस्मै ज्यैष्ठ्यायातिष्ठ- मानाः पञ्चधा व्यक्रामन्नग्निर् वसुभिः सोमो रुद्रैरिन्द्रो मरुद्भिर् वरुण आदित्यैर् बृहस्पतिर् विश्वैर् देवैस्तेऽमन्यन्तासुरेभ्यो वा इदम्भ्रातृव्येभ्यो रध्यामो यन्मिथो विप्रियाः स्मो या न इमाः प्रिया- स्तनुवस्ताः समवद्यामहै ताभ्यः स निरृच्छाद् यो ॥ [८] ॥ नः प्रथमो(१)ऽन्योऽन्यस्मै द्रुह्यादिति तस्माद्यः सतानूनप्त्रिणाम्प्रथमो द्रुह्यति स आर्तिमार्च्छति यत् तानूनप्त्रꣳ समवद्यति भ्रातृव्याभिभूत्यै भवत्यात्मना पराऽस्य भ्रातृव्यो भवति पञ्च कृत्वो ऽव द्यति पञ्चधा हि ते तथ् समवाद्यन्ताथो पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञमेवाव रुन्ध आपतये त्वा गृह्णामीत्याह प्राणो वा ॥ [९] ॥ आपतिः प्राणमेव प्रीणाति परिपतय इत्याह मनो वै परिपतिर् मन एव प्रीणाति तनूनप्त्र इत्याह तनुवो हि ते ताः समवाद्यन्त शाक्वरायेत्याह शक्त्यै हि ते ताः समवाद्यन्त शक्मन्नोजिष्ठायेत्याहौजिष्ठꣳ हि ते तदात्मनः समवाद्यन्तानाधृष्टमस्यनाधृष्यमित्याहानाधृष्टꣳ ह्येतदनाधृष्यन्देवानामोज ॥ [१०] ॥ इत्याह देवानाꣳ ह्येतदोजोऽभिशस्तिपा अनभिशस्ते- न्यमित्याहाभिशस्तिपा ह्येतदनभिशस्तेन्यमनु मे दीक्षान्दीक्षापतिर् मन्यतामित्याह यथाय- जुरेवैतद्घृतव्ँवै देवा वज्रङ्कृत्वा सोममघ्नन्नन्तिकमिव खलु वा अस्यैतच्चरन्ति यत् तानूनप्त्रेण प्रच-

रन्त्यꣳशुरꣳशुस्ते देव सोमाऽऽप्यायतामित्याह य ॥ [११] ॥ देवास्यापुवायते यन्मीयंतेत-
देवास्यैतेनाऽऽप्याययत्या तुभ्यमिन्द्रः प्यायतामा त्वमिन्द्राय प्यायस्वेत्याहोभावेवेन्द्रञ्च सोम-
ञ्चाऽऽप्याययत्या प्यायय सखीन्थ्सन्या मेधयेत्याहर्त्विजो वा अस्य सखायस्तानेवाऽऽप्या-
ययति स्वस्ति ते देव सोम सुत्यामशीयेत्याह ॥ [१२] ॥ त्याहाऽऽशिषमेवैतामा शास्ते प्र वा
एतेऽस्माल्लोकाच्च्यवन्ते ये सोममाप्याययन्त्यन्तरिक्षदेवत्यो हि सोम आप्यायित एष्टा रायः प्रेषे
भगायेत्याह द्यावापृथिवीभ्यामेव नमस्कृत्यास्मिँल्लोके प्रति तिष्ठन्ति देवासुराः सय्यँत्ता आसन्
ते देवा बिभ्यतोऽग्निम्प्राविशन् तस्मादाहुरग्निः सर्वा देवता इति ते ॥ [१३] ॥ ऽग्निमेव वरू-
थङ्कृत्वाऽसुरानभ्यभवन्नग्निमिव खलु वा एष प्र विशति योऽवान्तरदीक्षामुपैति भ्रातृव्याभिभूत्यै
भवत्यात्मना परास्य भ्रातृव्यो भवत्यात्मानमेव दीक्षया पाति प्रजामवान्तरदीक्षया सन्तरा-
म्मेखलाꣳ समायच्छते प्रजा ह्यात्मनोऽन्तरतरा तप्तव्रतो भवति मदन्तीभिर् मार्जयते निर् ह्यग्निः
शीतेन वायति समिद्ध्यै या ते अग्ने रुद्रिया तनूरित्याह स्वयैवैनद् देवतया व्रतयति सयोनित्वाय
शान्त्यै ॥ [१४] ॥

(यो वा ओजं आह य दशीये ति ते ऽग्न एकादश च) ॥ २ ॥

तेषामसुराणान्तिस्रः पुर आसन्नयस्मय्यवमाऽथ रजताऽथ हरिणी ता देवा जेतुन्नाशक्नुवन्
ता उपसदैवाजिगीषन् तस्मादाहुर् यश्चैवव्वेद यश्च नोपसदा वै महापुरञ्जयन्तीति त इषुꣳ सम-
स्कुर्वताग्निमनीकꣳ सोमꣳ शल्यव्विष्णुन्तेजनन्तेऽब्रुवन् क इमामसिष्यतीति ॥ [१५] ॥ रुद्र
इत्यब्रुवन् रुद्रो वै क्रूरः सोऽस्यत्विति सोऽब्रवीद् वरव्वृणा अहमेव पशूना मधिपतिरसानीति
तस्माद् रुद्रः पशूनामधिपतिस्ताꣳ रुद्रोऽवासृजथ् स तिस्रः पुरो भित्त्वैभ्यो लोकेभ्योऽसुरान्
प्राणुदत यदुपसद उपसद्यन्ते भ्रातृव्यपराणुत्त्यै नान्यामाहुतिम्पुरस्ताज्जुहुयाद्यदन्यामाहुतिम्पुर-
स्ताज्जुहुया ॥ [१६] ॥ दन्यन्मुखङ्कुर्याथ् स्रुवेणाऽऽघारमा घारयति यज्ञस्य प्रज्ञात्यै पराङ-
तिक्रम्य जुहोति पराच एवैभ्यो लोकेभ्यो यजमानो भ्रातृव्यान् प्र णुदते पुनरत्याक्रम्योपसद-
ञ्जुहोति प्रणुद्यैवैभ्यो लोकेभ्यो भ्रातृव्याञ्जित्वा भ्रातृव्यलोकमभ्यारोहति देवा वै याः प्रातरुपसद
उपासीदन्नहस्ताभिरसुरान् प्राणुदन्त याः सायꣳ रात्रियै ताभिर्यथ् सायंप्रातरुपसद ॥ [१७] ॥

उपसद्यन्तेऽहोरात्राभ्यामेव तद्यजमानो भ्रातृव्यान् प्र णुदते याः प्रातर् याज्याः स्यु स्ताः साय-
म्पुरोनुवाक्याः कुर्यादयातयामत्वाय तिस्र उपसद उपैति त्रय इमे लोका इमानेव लोकान्
प्रीणाति षट्थ् सम्पद्यन्ते षड् वा ऋतव ऋतूनेव प्रीणाति द्वादशाहीने सोम उपैति द्वादश मासाः
सँव्वथ्सरः संवथ्सरमेव प्रीणाति चतुर्विꣳशतिः सं ॥ [१८] ॥ पद्यन्ते चतुर्विꣳशतिरर्द्धमासा
अर्द्धमासानेव प्रीणात्याराग्ग्रामवान्तरदीख्षामुपेयाद्यः कामयेतास्मिन् मे लोकेऽर्द्धुकꣳ स्यादि-
त्येकमग्रेऽथ द्वावथ त्रीनथ चतुर एषा वा आराग्ग्राऽवान्तरदीख्षाऽस्मिन्नेवास्मै लोकेऽर्द्धुकम्भ-
वति परोवरीयसीमवान्तरदीख्षामुपेयाद्यः कामयेतामुष्मिन् मे लोकेऽर्द्धुकꣳ स्यादिति चतु-
रोऽग्रे ऽथ त्रीनथ द्वावथैकमेषा वै परोवरीयस्यवान्तरदीख्षाऽमुष्मिन्नेवास्मै लोकेऽर्द्धुकम्भ-
वति ॥ [१९] ॥

(असिष्यतीति जुहुयाथ् सायम्प्रातरुपसद् श्चतुर्विꣳशतिः सं चतुरोऽग्रे षोडश च) ॥ ३ ॥

⋆

सुवर्गँव्वा एते लोकँय्यँन्ति य उपसद उपयन्ति तेषाँय्य उन्नयते हीयत एव स नोदनेषीति
सून्नीयमिव यो वै स्वार्थेताँय्यताꣳ श्रान्तो हीयत उत स निष्ठाय सह वसति तस्माथ् सकृदु-
न्नीय नापरमुन्नयेत दद्ध्नोन्नयेतैतद्वै पशूनाꣳ रूपꣳ रूपेणैव पशूनव रुन्धे ॥ [२०] ॥ यज्ञो
देवेभ्यो निलायत विष्णू रूपङ्कृत्वा स पृथिवीम्प्राविशत् तन्देवा हस्तान्थ् सꣳरभ्यैच्छन् तमिन्द्र
उपर्युपर्यत्यक्रामथ् सोऽब्रवीत् को माऽयमुपर्युपर्यत्यक्रमीदित्यहन्दुर्गे हन्तेत्यथ कस्त्वमित्य-
हन्दुर्गादाहर्तेति सोऽब्रवीद् दुर्गे वै हन्ताऽवोचथा वराहोऽयँव्वाममोषः ॥ [२१] ॥ सप्ताना-
ङ्गिरीणाम्परस्ताद्वित्तँव्वेद्यमसुराणाम्बिभर्ति तञ्जहि यदि दुर्गे हन्ताऽसीति स दर्भपुञ्जीलमुद्वृह्य
सप्त गिरीन् भित्त्वा तमहन्थ् सोऽब्रवीद् दुर्गाद्वा आहर्ताऽवोचथा एतमा हरेति तमेभ्यो यज्ञ
एव यज्ञमाऽहरद्यत् तद्वित्तँव्वेद्यमसुराणामविन्दन्त तदेकँव्वेद्यै वेदित्वमसुराणा ॥ [२२] ॥
व्वाँ इयमग्र आसीद् यावदासीनः परापश्यति तावद् देवानान्ते देवा अब्रुवन्नस्त्वेव नोऽस्या-
मपीति कियद्वो दास्याम इति यावदियꣳ सलावृकी त्रिः परिक्रामति तावन्नो दत्तेति स इन्द्रः
सलावृकी रूपङ्कृत्वेमान्त्रिः सर्वतः पर्यक्रामत् तदिमामविन्दन्त यदिमामविन्दन्त तद् वेद्यै
वेदित्वꣳ ॥ [२३] ॥ सा वा इयꣳ सर्वैव वेदिरियति शख्यामीति त्वा अवमाय यजन्ते त्रिꣳशत्

पदानि पश्चात् तिरश्चीं भवति षट्त्रिꣳशत् प्राची चतुर्विꣳशतिः पुरस्तात् तिरश्ची दशदश सम्पद्यन्ते दशाक्षरा विराडन्नं विराड् विराजैवान्नाद्यमव रुन्ध उद्धन्ति यदेवास्या अमेध्यन्तदप हन्त्यु-द्धन्ति तस्मादोषधयः परा भवन्ति बर्हिः स्तृणाति तस्मादोषधयः पुनरा भवन्त्युत्तरम्बर्हिष उत्तरबर्हिः स्तृणाति प्रजा वै बर्हिर् यजमान उत्तरबर्हिर् यजमानमेवायजमानादुत्तरङ्करोति तस्माद्यजमानोऽयजमानादुत्तरः ॥ [२४] ॥

(रुन्धे वाममोषो वेदित्वमसुराणांवेदित्वंभवन्ति पञ्चविꣳशतिश्च) ॥ ४ ॥

यद्वा अनीशानो भारमादत्ते वि वै स लिशते यद् द्वादश साह्नस्योपसदः स्युस्तिस्रोऽहीनस्य यज्ञस्य विलोम क्रियेत तिस्र एव साह्नस्योपसदो द्वादशाहीनस्य यज्ञस्य सवीर्यत्वायाथो सलोम क्रियते वथ्सस्यैकः स्तनो भागी हि सोऽथैकꣳ स्तनवँव्रतमुपैत्यथ द्वावथ त्रीनथ चतुर एतद् वै ॥ [२५] ॥ क्षुरपवि नाम व्रतय्येँन प्र जातान् भ्रातृव्यान् नुदते प्रति जनिष्यमाणानथो कनीयसैव भूय उपैति चतुरोऽग्रे स्तनान् व्रतमुपैत्यथ त्रीनथ द्वावथैकमेतद् वै सुजघनन्नाम व्रतन्तपस्यꣳ सुवर्ग्यमथो प्रैव जायते प्रजया पशुभिर्यवागू राजन्यस्य व्रतङ्क्रूरेव वै यवागूः क्रूर इव ॥ [२६] ॥ राजन्यो वज्रस्य रूपꣳ समृद्ध्या आमिक्षा वैश्यस्य पाकयज्ञस्य रूपम्पुष्ट्यै पयो ब्राह्मणस्य तेजो वै ब्राह्मणस्तेजः पयस्तेजसैव तेजः पय आत्मन् धत्तेऽथो पयसा वै गर्भा वर्द्धन्ते गर्भ इव खलु वा एष यद् दीक्षितो यदस्य पयो व्रतम्भवत्यात्मानमेव तद् वर्द्धयति त्रिव्रतो वै मनुरासीद् द्विव्रता असुरा एकव्रता ॥ [२७] ॥ देवाः प्रातर्मद्ध्यन्दिने सायन्तन् मनोर् व्रतमासीत् पाकयज्ञस्य रूपम्पुष्ट्यै प्रातश्च सायञ्चासुराणान्निर्मद्ध्यङ्क्षुधो रूपन्ततस्ते पराऽभवन् मद्ध्यन्दिने मद्ध्यरात्रे देवानान्ततस्तेऽभवन्थ् सुवर्गँल्लोकमायन्यदस्य मद्ध्यन्दिने मद्ध्यरात्रे व्रतम्भवति मद्ध्यतो वा अन्नेन भुञ्जते मद्ध्यत एव तदूर्जन्धत्ते भ्रातृव्याभिभूत्यै भव-त्यात्मना ॥ [२८] ॥ पराऽस्य भ्रातृव्यो भवति गर्भो वा एष यद् दीक्षितो योनिर् दीक्षि-तविमितय्यँद् दीक्षितो दीक्षितविमितात् प्रवसेद् यथा योनेर् गर्भः स्कन्दति तादृगेव तन्न प्रवस्तव्यमात्मनो गोपीथायैष वै व्याघ्रः कुलगोपो यदग्निस्तस्माद् यद् दीक्षितः प्रवसेथ् स

एनमीश्वरोऽनूत्थाय हन्तोर् न प्रवस्तव्यमात्मनो गुप्त्यै दक्षिणतः शय एतद्वै यजमानस्या ऽऽय-
तनꣳ स्व एवाऽऽयतने शयेऽग्निमभ्यावृत्य शये देवता एव यज्ञमभ्यावृत्य शये ॥ [२९] ॥

(एतद्वै क्रूर इवै कव्रता आत्मना यजमानस्य त्रयोदश च) ॥ ५ ॥

पुरोहविषि देवयजने याजयेद्यङ्कामयेतोपैनमुत्तरो यज्ञो नमेदभि सुवर्गँल्लोकञ्जयेदित्येतद्वै
पुरोहविर्देवयजनँय्यस्य होता प्रातरनुवाकमनुब्रुवन्नग्निमप आदित्यमभि विपश्यत्युपैनमुत्तरो
यज्ञो नमत्यभि सुवर्गँल्लोकञ्जयत्याप्ते देवयजने याजयेद्भ्रातृव्यवन्तम्पन्थाँव्वाऽधिस्पर्शयेत्
कर्तँव्वा यावन्नानसे यातवै ॥ [३०] ॥ न रथायैतद्वा आप्तन्देवयजनमाप्नोत्येव भ्रातृव्यन्नै-
नम्भ्रातृव्य आप्नोत्येकोन्नते देवयजने याजयेत्पशुकाममेकोन्नताद्वै देवयजनादङ्गिरसः पशून्-
सृजन्तान्तरा सदोहविर्द्धाने उन्नतꣳ स्यादेतद्वा एकोन्नतन्देवयजनम्पशुमानेव भवति त्र्युन्नते
देवयजने याजयेथ्सुवर्गकामन्त्र्युन्नताद्वै देवयजनादङ्गिरसस्सुवर्गँल्लोकमायन्नन्तराऽऽहवनीयञ्च
हविर्द्धानञ्चो ॥ [३१] ॥ न्नतꣳ स्यादन्तरा हविर्द्धानञ्च सदश्चान्तरा सदश्च गार्हपत्यञ्चै-
तद्वै त्र्युन्नतन्देवयजनꣳ सुवर्गमेव लोकमेति प्रतिष्ठिते देवयजने याजयेत् प्रतिष्ठाकाममेतद्वै
प्रतिष्ठितन्देवयजनँय्यथ् सर्वतः समम्प्रत्येव तिष्ठति यत्रान्याअन्या ओषधयो व्यतिषक्ताः स्यु
स्तद्याजयेत् पशुकाम मेतद्वै पशूनाꣳ रूपꣳ रूपेणैवास्मै पशू ॥ [३२] ॥ नव रुन्धे पशुमानेव
भवति निर्ऋतिगृहीते देवयजने याजयेद्यङ्कामयेत निर्ऋत्याऽस्य यज्ञङ्ग्राहयेयमित्येतद्वै निर्-
ऋतिगृहीतन्देवयजनँय्यथ् सदृश्यै सत्या ऋक्षं निर्ऋत्यैवास्य यज्ञङ्ग्राहयति व्यावृत्ते देवयजने
याजयेद् व्यावृत्कामँय्यम्पात्रे वा तल्पे वा मीमाꣳसेरन् प्राचीनमाहवनीयात् प्रवणꣳ स्यात्
प्रतीचीनङ्गार्हपत्यादेतद्वै व्यावृत्तन्देवयजनव्वि पाप्मना भ्रातृव्येणाऽऽवर्तते नैनम्पात्रे न तल्पे
मीमाꣳसन्ते कार्ये देवयजने याजयेद्भूतिकामङ्कार्यो वै पुरुषो भवत्येव ॥ [३३] ॥

(यातवैहविर्द्धानञ्च पशून् पाप्मना ऽष्टादश च) ॥ ६ ॥

तेभ्य उत्तरवेदिस्सिꣳही रूपङ्कृत्वोभयानन्तराऽपक्रम्यातिष्ठत्ते देवा अमन्यन्त यतरान्वा
इयमुपावर्थ्स्यति त इदम्भविष्यन्तीति तामुपामन्त्रयन्त साऽब्रवीद्वरँव्वृणै सर्वान् मया कामान्

व्यꣳश्नवथ पूर्वान्तु माऽग्नेराहुतिरश्नवता इति तस्मादुत्तरवेदिम्पूर्वामग्नेर्व्याघारयन्ति वारेवृतꣳ ह्यस्यै शम्यया परि मिमीते ॥ [३४] ॥ मात्रैवास्यै साऽथो युक्तेनैव युक्तमव रुन्धे वित्तायनी मेऽसीत्याह वित्ता ह्येनानावत् तिक्तायनी मेऽसीत्याह तिक्तान्ह्येनानावदवतान् मा नाथितमित्याह नाथितान्ह्येनानावदवतान् मा व्यथितमित्याह व्यथितान् ह्येनानावद्विदेरग्निर् नभो नामा ॥ [३५] ॥ ग्ने अङ्गिर इति त्रिर्हरति य एवैषु लोकेष्व ग्नयस्तानेवाव रुन्धे तूष्णीञ्चतुर्थꣳ हरत्यनिरुक्तमेवाव रुन्धे सिꣳहीरसि महिषीरसीत्याह सिꣳहीर् ह्येषा रूपङ्कृत्वोभयानन्तरा ऽपक्रम्यातिष्ठदुरु प्रथस्वोरु ते यज्ञपतिः प्रथतामित्याह यजमानमेव प्रजया पशुभिः प्रथयति ध्रुवा ॥ [३६] ॥ ऽसीति सꣳ हन्ति धृत्यै देवेभ्यः शुन्धस्व देवेभ्यः शुंभस्वेत्यव चोक्षति प्र च किरति शुद्ध्या इन्द्रघोषस्त्वा वसुभिः पुरस्तात् पात्वित्याह दिग्भ्य एवैनाम्प्रोक्षति देवाꣳश्चेदुत्तरवेदि रुपावर्तीहैव वि जयामहा इत्यसुरा वज्रमुद्यत्य देवानभ्यायन्त तानिन्द्रघोषो वसुभिः पुरस्तादपा ॥ [३७] ॥ नुदत मनोजवाः पितृभिर् दक्षिणतः प्रचेता रुद्रैः पश्चाद्विश्वकर्माऽऽदित्यैरुत्तरतो यदेवमुत्तरवेदिम्प्रोक्षति दिग्भ्य एव तद्यजमानो भ्रातृव्यान् प्र णुदत इन्द्रो यतीन्थ् सालावृकेभ्यः प्रायच्छत् तान् दक्षिणत उत्तरवेद्या आदनूयत् प्रोक्षणीनामुच्छिष्येत तद् दक्षिणत उत्तरवेद्यै नि नयेद्यदेव तत्र क्रूरन्तत् तेन शमयति यन्द्विष्यात् तन्ध्यायेच्छुचै वैनमर्पयति ॥ [३८] ॥

(मिमीते नाम ध्रुवा ऽपा शुचा त्रीणि च) () ॥ ७ ॥

सोत्तरवेदिरब्रवीथ् सर्वान् मया कामान् व्यꣳश्नवथेति ते देवा अकामयन्तासुरान् भ्रातृव्यानभि भवेमेति तेऽजुहवुः सिꣳहीरसि सपत्नसाही स्वाहेति तेऽसुरान् भ्रातृव्यानभ्यभवन् तेऽसुरान् भ्रातृव्या नभिभूयाकामयन्त प्रजाव्विँन्देमहीति तेऽजुहवुः सिꣳहीरसि सुप्रजावनिः स्वाहेति ते प्रजामविन्दन्त ते प्रजाव्वित्त्वा ॥ [३९] ॥ ऽकामयन्त पशून्विन्देमहीति तेऽजुहवुः सिꣳहीरसि रायस्पोषवनिः स्वाहेति ते पशूनविन्दन्त ते पशून्वित्त्वाऽकामयन्त प्रतिष्ठाव्विँन्देमहीति तेऽजुहवुः सिꣳहीरस्यादित्यवनिः स्वाहेति त इमाम्प्रतिष्ठामविन्दन्त त इमाम्प्रतिष्ठाव्वित्त्वाऽकामयन्त देवता आशिष उपेयामेति तेऽजुहवुः सिꣳहीरस्या वह देवान् देवयते

॥ [४०] ॥ यजमानाय स्वाहेति ते देवता आशिष उपायन् पञ्च कृत्वो व्याघारयति पञ्चाँख्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञमेवाव रुन्धेऽख्ष्णया व्याघारयति तस्मादख्ष्णया पशवोऽङ्गानि प्र हरन्ति प्रतिष्ठित्यै भूतेभ्यस्त्वेति स्रुचमुद् गृह्णाति य एव देवा भूतास्तेषान्तद्भागधेयन्तानेव तेन प्रीणाति पौतुद्रवान् परिधीन् परि दधात्येषा ॥ [४१] ॥ ह्लोकानाव्विधृत्या अग्नेस्त्रयो ज्यायाꣳसो भ्रातर आसन् ते देवेभ्यो हव्यँव्वहन्तः प्रामीयन्त सोँऽग्निरबिभेदित्थँव्वाव स्य आर्तिमाऽरिष्यतीति स निलायत स याँव्वनस्पतिष्ववसत् ताम्पूतुद्रौ यामोषधीषु ताꣳ सुगन्धितेजने याम्पशुषु ताम्पे-त्वस्यान्तरा श्रृङ्गे तन्देवताः प्रैषमैच्छन् तमन्वविन्दन् तमब्रुव ॥ [४२] ॥ न्नुप न आ वर्तस्व हव्यन्नो वहेति सोँऽब्रवीद् वरँव्वृणै यदेव गृहीतस्याहुतस्य बहिःपरिधि स्कन्दात् तन्मे भ्रातृ-णाम्भागधेयमसदिति तस्माद्यद्गृहीतस्याहुतस्य बहिःपरिधि स्कन्दति तेषान्तद् भागधेयन्ता-नेव तेन प्रीणाति सोँऽमन्यतास्थन्वन्तो मे पूर्वे भ्रातरः प्रामेषतास्थानि शातया इति स यान्य ॥ [४३] ॥ स्थान्यशातयत तत् पूतुद्रभवद्यन्माꣳसमुपमृतन्तद्गुल्गुलु यदेतान्थ् संभारान्थ् सं भरत्यग्निमेव तथ् संभरत्यग्नेः पुरीषमसीत्याहाग्नेर्ह्येतत् पुरीषँय्यथ् संभारा अथो खल्वाहुरेते वावै-नन्ते भ्रातरः परि शेरे यत् पौतुद्रवाः परिधय इति ॥ [४४] ॥

(वित्त्वा देवयत एषा मब्रुवन् यानि चतुश्चत्वारिꣳशच्च) ॥ ८ ॥

बद्धमव स्यति वरुणपाशादेवैनं मुञ्चति प्र णेनेक्ति मेध्यं एवैनं करोति सावित्रियर्चा हुत्वा हविर्धाने प्र वर्तयति सवितृप्रसूत एवैने प्र वर्तयति वरुणो वा एष दुर्वागुभयतो बद्धो यदख्षः स यदुथ्सर्जेद्यजमानस्य गृहानभ्युथ्सर्जेथ् सुवाग् देव दुर्याꣳ आ वदेत्याह गृहा वै दुर्याः शान्त्यै पत्न्यु ॥ [४५] ॥ पानक्ति पत्नी हि सर्वस्य मित्रम्मित्रत्वाय यद् वै पत्नी यज्ञस्य करोति मिथु-नन्तदथो पत्निया एवैष यज्ञस्यान्वारंभोऽनवच्छित्त्यै वर्त्मना वा अन्वित्य यज्ञꣳ रख्षाꣳसि जिघाꣳसन्ति वैष्णवीभ्यामृग्भ्याँव्वर्त्मनोर् जुहोति यज्ञो वै विष्णुर् यज्ञादेव रख्षाꣳस्यप हन्ति यदद्ध्वर्युरनग्नावाहुतिञ्जुहुयादन्धोँऽद्ध्वर्युः स्याद्रख्षाꣳसि यज्ञꣳ हन्युर् ॥ [४६] ॥ हिरण्य-मुपास्य जुहोत्यग्निवत्येव जुहोति नान्धोँऽद्ध्वर्युर् भवति न यज्ञꣳ रख्षाꣳसि घ्नन्ति प्राची प्रेतमद्ध्वरङ्कल्पयन्ती इत्याह सुवर्गमेवैनं लोकङ्गमयत्यत्र रमेथाँव्वर्ष्मन् पृथिव्या इत्याह वर्ष्म

ह्येतत् पृथिव्या यद् देवयजनꣳ शिरो वा एतद्यज्ञस्य यद्धविर्द्धानन्दिवो वा विष्णवुत वा पृथिव्या ॥ [४७] ॥ इत्याशीर्पदयर्चा दक्षिणस्य हविर्द्धानस्य मेथीन्नि हन्ति शीर्षत एव यज्ञस्य यजमान आशिषोऽव रुन्धे दण्डो वा औपरस्तृतीयस्य हविर्द्धानस्य वषट्कारेणाक्षमच्छिनद्यत्तृतीयञ्छदिर् हविर्द्धानयोरुदाह्रियते तृतीयस्य हविर्द्धानस्यावरुद्ध्यै शिरो वा एतद्यज्ञस्य यद्धविर्द्धानव्विँष्णो रराटमसि विष्णोः पृष्ठमसीत्याह तस्मादेतावद्धा शिरो विष्यूतव्विँष्णोः स्यूरसि विष्णोर् ध्रुवमसीत्याह वैष्णवꣳ हि देवतया हविर्द्धानय्यँम्प्रथमङ्ग्रन्थिङ्ग्रथ्नीयाद्यत् तन्न विस्रꣳसयेदमेहेनाद्ध्वर्युः प्र मीयेत तस्माथ् स विस्रस्यः ॥ [४८] ॥

(पत्नीहन्युर् वा पृथिव्याविष्यूतव्विँष्णोःषड्विꣳशतिश्च) ॥ ९ ॥

देवस्य त्वा सवितुः प्रसव इत्यभ्रिमा दत्ते प्रसूत्या अश्विनोर् बाहुभ्यामित्याहाश्विनौ हि देवानामद्ध्वर्यू आस्ताम्पूष्णो हस्ताभ्यामित्याह यत्यै वज्र इव वा एषा यदभ्रिरभ्रिरसि नारिरसीत्याह शान्त्यै काण्डेकाण्डे वै क्रियमाणे यज्ञꣳ रक्षाꣳसि जिघाꣳसन्ति परिलिखितꣳ रक्षः परिलिखिता अरातय इत्याह रक्षसामपहत्या ॥ [४९] ॥ इदमहꣳ रक्षसो ग्रीवा अपि कृन्तामि योऽस्मान् द्वेष्टि यञ्च वयन्द्विष्म इत्याह द्वौ वाव पुरुषौ यञ्चैव द्वेष्टि यश्चैनन्द्वेष्टि तयोरेवानन्तरायङ्ग्रीवाः कृन्तति दिवे त्वाऽन्तरिक्षाय त्वा पृथिव्यै त्वेत्याहैभ्य एवैनाँल्लोकेभ्यः प्रोक्षति परस्तादर्वाचीम्प्रोक्षति तस्मात् ॥ [५०] ॥ परस्तादर्वाचीम्मनुष्या ऊर्जमुप जीवन्ति क्रूरमिव वा एतत् करोति यत् खनत्यपोऽव नयति शान्त्यै यवमतीरव नयत्यूर्ग्वै यव ऊर्गुदुंबर ऊर्जैवोर्जꣳ समर्द्धयति यजमानेन सम्मितौदुंबरी भवति यावानेव यजमानस्तावतीमेवास्मिन्नूर्जन्दधाति पितृणाꣳ सदनमसीति बर्हिरव स्तृणाति पितृदेवत्या(१)ꣳ ॥ [५१] ॥ ह्येतद्यन्निखातय्यँद्बर्हिरनवस्तीर्य मिनुयात् पितृदेवत्या निखाता स्याद्बर्हिरवस्तीर्य मिनोत्यस्यामेवैनाम्मिनोत्यथो स्वारुहमेवैनाङ्करोत्युद्दिवꣳ स्तभानाऽऽ*न्तरिक्षम्पृणेत्याहैषाँल्लोकानाव्विँधृत्यै द्युतानस्त्वा मारुतो मिनोत्वित्याह द्युतानो ह स्म वै मारुतो देवानामौदुंबरीम्मिनोति तेनैवै ॥ [५२] ॥ नाम्मिनोति ब्रह्मवनिन्त्वा क्षत्रवनिमित्याह यथायजुरेवैतद् घृतेन द्यावापृथिवी आ पृणेथामित्यौदुंबर्याञ्जुहोति द्यावापृथिवी एव रसेनानक्त्यान्तमन्ववस्रावयत्यान्तमेव

यजमानन्तेजसाऽनक्त्यैन्द्रमसीति छदिरधि नि दधात्यैन्द्रꣳ हि देवतया सदो विश्वजनस्य छाये-त्याह विश्वजनस्य ह्येषा छाया यथ् सदो नवछदि ॥ [५३] ॥ तेजस्कामस्य मिनुयात् त्रिवृता स्तोमेन सम्मितन्तेजस्त्रिवृत् तेजस्व्येव भवत्येकादश छदीन्द्रियकामस्यैकादशाख्षरा त्रिष्टुगि-न्द्रियन्त्रिष्टुगिन्द्रियाव्येव भवति पञ्चदशछदि भ्रातृव्यवतः पञ्चदशो वज्रो भ्रातृव्याभिभूत्यै सप्त-दशछदि प्रजाकामस्य सप्तदशः प्रजापतिः प्रजापतेराप्त्या एकविꣳशतिछदि प्रतिष्ठाकामस्यैक-विꣳशः स्तोमानाम्प्रतिष्ठा प्रतिष्ठित्या उदरव्वै सद ऊर्गुदुंबरो मद्ध्यत औदुंबरीम्मिनोति मद्ध्यत एव प्रजानामूर्जन्दधाति तस्मात् ॥ [५४] ॥ मद्ध्यत ऊर्जा भुञ्जते यजमानलोके वै दख्षि-णानि छदीꣳषि भ्रातृव्यलोक उत्तराणि दख्षिणान्युत्तराणि करोति यजमानमेवायजमानादुत्त-रङ्करोति तस्माद् यजमानोऽयजमानादुत्तरोऽन्तर्वर्तान् करोति व्यावृत्त्यै तस्मादरण्यम्प्रजा उप जीवन्ति परि त्वा गिर्वणो गिर इत्याह यथायजुरेवैतदिन्द्रस्य स्यूरसीन्द्रस्य ध्रुव मसीत्याहैन्द्रꣳ हि देवतया सदो यम्प्रथमङ्ग्रन्थिङ्ग्रथ्नीयाद्यत् तन्न विस्रꣳसयेदमेहेनाद्ध्वर्युः प्र मीयेत तस्माथ् स विस्रस्यः ॥ [५५] ॥

(अपहत्यै तस्मात् पितृदेवत्यं तेनैव नवछदि तस्माथ् सदः पञ्चदश च) ॥ १० ॥

शिरो वा एतद्यज्ञस्य यद्धविर्द्धानम्प्राणा उपरवा हविर्द्धाने खायन्ते तस्माच्छीर्षन् प्राणा अधस्तात् खायन्ते तस्मादधस्ताच्छीर्ष्णः प्राणा रख्षोहणो वलगहनो वैष्णवान् खनामीत्याह वैष्णवा हि देवतयोपरवा असुरा वै निर्यन्तो देवानाम्प्राणेषु वलगान् न्यखनन् तान् बाहुमा-त्रेऽन्वविन्दन् तस्माद् बाहुमात्राः खायन्त इदमहन्तव्वँलगमुद्वपामि ॥ [५६] ॥ यन्नः समानो यमसमानो निचखानेत्याह द्वौ वाव पुरुषौ यश्चैव समानो यश्चासमानो यमेवास्मै तौ वलगन्निख-नत स्तमेवोद्वपति सन्तृणत्ति तस्माथ् सन्तृण्णा अन्तरतः प्राणा न सम्भिनत्ति तस्मादसंभिन्नाः प्राणा अपोऽव नयति तस्मादार्द्रा अन्तरतः प्राणा यवमतीरव नय ॥ [५७] ॥ त्यूर्ग् वै यवः प्राणा उपरवाः प्राणेष्वेवोर्जन्दधाति बर्हिरव स्तृणाति तस्माल्लोमशा अन्तरतः प्राणा आज्येन व्याघारयति तेजो वा आज्यम्प्राणा उपरवाः प्राणेष्वेव तेजो दधाति हनू वा एते यज्ञस्य यद्-धिषवणे न सन्तृणत्त्यसन्तृण्णे हि हनू अथो खलु दीर्घसोमे सन्तृद्ये धृत्यै शिरो वा एतद्यज्ञस्य

यद्ध॑वि॒र्धानं॑ ॥ [५८] ॥ प्रा॒णा उ॑प॒रवा॒ हनू॒ अधि॑षव॒णे जि॒ह्वा चर्म॒ ग्रावा॑णो॒ दन्ता॒ मुख॑माहव॒-
नीयो॒ नासि॑कोत्तरवे॒दिरु॒दर॒ꣳ॒ सदो॑ य॒दा खलु॒ वै जि॒ह्वया॑ द॒थ्स्वधि॒ खाद॒त्यथ॒ मुख॑ङ्गच्छति य॒दा
मु॒खङ्गच्छत्यथो॒दर॑ङ्गच्छति॒ तस्मा॑द्धवि॒र्धाने॒ चर्म॑न्नधि॒ ग्राव॑भिरभि॒षुत्या॑ऽऽहव॒नीये॑ हु॒त्वा प्र॒त्यञ्चः॑
प॒रेत्य॒ सद॑सि भख्षयन्ति॒ यो वै वि॒राजो॑ यज्ञमु॒खे दोह॒ँव्वेद॑ दु॒ह ए॒वै ना॑मि॒यँव्वै वि॒राट् तस्यै॒ त्वक्
चर्मौधो॑ऽधिषव॒णे स्तना॑ उप॒रवा ग्रावा॑णो व॒थ्सा ऋ॒त्विजो॑ दुह॒न्ति सोमः॒ पयो॒ य ए॒वँव्वेद॑ दु॒ह
ए॒वैना॑म् ॥ [५९] ॥

(व॒पा॒मि॒ यव॑मती॒रवं॑ नयति ह॒वि॒र्धान॑ मे॒व त्रयो॑विꣳशतिश्च) ॥ ११ ॥

समाप्ति कोर्वैः

(यदु॒भौ दे॑वासु॒रा मि॒थ स्तेषा॑ꣳ सुव॒र्गं यद्वा अनी॑शानः पु॒रोह॑विषि॒ तेभ्यः॒ सोत्त॑रवे॒दिर् ब॒द्धन् दे॒वस्या॒भ्रिँव्वज्रः॑ शिरो॒ वा एका॑दश)
(यदु॒भा वित्या॑ह दे॒वाना॑ य॒ज्ञो दे॒वेभ्यो॒ न रथा॑य यज॑मानाय॒ प॒रस्ता॒द॒र्वा॒ची न्नव॑ पञ्चा॒शत्)
(यदु॒भौ दु॒ह ए॒वैना॑)

॥ हरिः ॐ ॥

षष्ठकाण्डे द्वितीयः प्रश्नः समाप्तः

अनुवाकाः	पञ्चशत्यः
११	५९

ॐ